आग्नेय्यां मनसस्तापो नैरृते क्रूरकर्म्मकृत् ।
वायव्यां बलवित्तञ्च पीयमाने जले प्रिये ॥
स्थानस्य पावके भागे वापीकूपतडागकम् ।
अग्निदाहं सदा कुर्य्यात् समासु च चतुष्पदाम् ॥
नैरृते पीयमानन्तु आत्मना दुःखितो भवेत् ।
कन्यापि तज्जलं पीत्वा पतिं गृह्णाति कामतः ॥
इति देवीपुराणे नन्दाकुण्डप्रवेशाध्यायः ॥

तत्करणफलं यथा,—

शम्भिल उवाच ।

"तडागोदकवापीनां कृतानामिह यत् फलम् ।
विशेषेण पितृश्रेष्ठ वक्तुमर्हस्यशेषतः ॥

यम उवाच ।

धर्म्मस्यार्थस्य कामस्य यशसश्च द्विजोत्तम ।
तडागं सुप्रभूताम्बु परमायतनं स्मृतम् ॥
देवताः पितरो नागा गन्धर्व्वा यक्षराक्षसाः ।
पशुपक्षिमनुष्याश्च संश्रयन्ति जलाशयम् ॥
कृतस्तं तारयते वंशं यस्य खाते जलाशये ।
गावः पिबन्ति पानीयं मनुष्याः पशवस्तथा ॥
शरदन्ते तडागेषु सलिलं यस्य तिष्ठति ।
अग्निष्टोमफलं तस्य प्रवदन्ति मनीषिणः ॥
येषां शिशिरकाले तु पानीयं प्रतितिष्ठति ।
वाजपेयातिरात्राभ्यां फलं विन्दन्ति मानवाः ॥
वसन्ते चैव ग्रीष्मे तु सलिलं यस्य तिष्ठति ।
राजसूयाश्वमेधाभ्यां स फलं समुपाप्नुते ॥
तडागं सर्व्वसत्त्वानां जीवनन्तु दिवानिशम् ।
तस्मात् सर्व्वात्मना वत्स तडागमिह कारयेत् ॥
कृतश्च हि तारयेद्वंशं पुरुषस्य न संशयः ।
सावतारः कृतः कूपः सम्प्रभूतजलस्तथा ॥
यस्य स्वादुजलं कूपे पिबन्ति सततं जनाः ।
स नरो विरजो लोके देववद्दिवि मोदते ॥
पीत्वैवेक्षुरसं क्षीरं दधि मधु सुरासवम् ।
तावत् पिपासा नायेति यावत्तोयं न पीयते ॥
जीवन्ति चान्नरहिता दिवसानि बहून्यपि ।
तृषितस्तोयरहितो दिनमेकं न जीवति ॥
तस्माद्ददाति यो नित्यं पानीयं प्राणिनामिह ।
स ददाति नरः प्राणान् माभूत्ते ह्यत्र संशयः ॥
प्राणदानात् परं नाम नान्यद्दानं हि विद्यते ।
तस्माद्वापीश्च कूपांश्च तडागानि च कारयेत् ॥
सदृशानि च विप्रर्षे यदीच्छेत् श्रियमात्मनः ।
शुष्कं परनिपानन्तु यः कारयति शक्तितः ।
सन्तारयति भूयोऽपि द्विगुणं तस्य वै फलम् ॥"
इति वह्निपुराणे तडागकूपप्रशंसानामाध्यायः ॥

वापीहः, पुं, (वापीं जहातीति । हा त्यागे + कः । पाने वापीजलवर्ज्जनादस्य तथात्वम् ।) चातकपक्षी । इति त्रिकाण्डशेषः ॥

वाप्यं, क्ली, (वाप्यां भवमिति । वापी + "दिगादिभ्यो यत् ।" ४ । ३ । ५४ । इति यत् ।) कुष्ठौषधम् । इत्यमरः । २ । ४ । १२६ ॥ वापीभवे, त्रि ॥ (यथा, सुश्रुते सूत्रस्थाने ४५ अध्याये ।
"ताडागं वातलं स्वादु कषायं कटुपाकि च ।
वातश्लेष्महरं वाप्यं सक्षारं कटुपित्तलम् ॥"
वप् + ण्यत् ।) वपनीये च, त्रि ॥

वामं, क्ली, (वा + "अर्त्तिस्तुसुहुसृधृक्षीति ।" उणा० १ । १३६ । इति मन् ।) धनम् । इति मेदिनी । मे, २६ ॥ वास्तूकम् । इति जटाधरः ॥

वामः, त्रि, (वमति वम्यते वेति । वम उद्गिरणे + "ज्वलितिकसन्तेभ्यो णः ।" ३ । १ । १४० । इति णः । यद्वा, वातीति । वा गतिगन्धनयोः + "अर्त्तिस्तुसुहुसृधृक्षिक्षुभायावापदीति । उणा० १ । १३६ । इति मन् ।) वल्गुः । (यथा, रघौ । ७ । ५७ ।
"स दक्षिणं तूणमुखेन वामं
व्यापारयन् हस्तमलक्ष्यताजौ ।
आकर्णकृष्टा सकृदस्य योद्धुः
मौर्व्वीव बाणान् सुषुवे रिपुघ्नान् ॥")
प्रतीपः । (यथा, वैराग्यशतके । ५३ ।
"दुःखेनोपार्ज्जयन्ते पाल्यन्ते प्रत्यहञ्च लाल्यन्ते ।
वामाः स्त्रियो विमूढैरुपभुञ्जानाः सुखं विगुणम् ॥"
यथाच, साहित्यदर्पणे । १० ।
"वामा यूयमहो विडम्बरसिकः कीदृक् स्मरो वर्त्तते ॥")
सव्यः । इत्यमरमेदिनीकारौ ॥ (यथा, राजतरङ्गिण्याम् । १ । २ ।
"भालं वह्निशिखाङ्कितं दधदधिश्रोत्रं वहन् सम्भृतक्रीडत् कुण्डलिजृम्भितं जलधिजच्छायाच्छकण्ठच्छविः ।
वक्षो बिभ्रदहीनकञ्चुकचितं बद्धाङ्गनार्द्धस्य वो भागः पुङ्गवलाञ्छनोऽस्तु यशसे वामोऽथवा दक्षिणः ॥")
अधमः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ वामहस्तेन जलपानभोजननिषेधो यथा । हारीतः ।
"न पिबेन्न च भुञ्जीत द्विजः सव्येन पाणिना ।
नैकहस्तेन च जलं शूद्रेणावर्ज्जितं पिबेत् ॥"
इति आह्निकतत्त्वम् ॥
अपि च ।
"न वामहस्तेनोद्धृत्य पिबेद्वक्त्रेण वा जलम् ।
नोत्तरेदनुपस्पृश्य नाप्सु रेतः समुत्सृजेत् ॥"
इति कौर्म्मे १५ अध्यायः ॥
"वामः कायो ब्राह्मणोऽपि मांसमद्यादिभुक्तये ।
कृतो मया मोहनाय चार्व्वाकादिप्रवर्त्तकः ॥"
इति कालिकापुराणे ७७ अध्यायः ॥
(वननीयः । यथा, ऋग्वेदे । ६ । ५३ । २ ।
"अभिनो नर्य्यं वसु वीरं प्रयतदक्षिणम् ।
वामं गृहपतिं नय ।"
"वामं वननीयम् ।" इति तद्भाष्ये सायणः ॥ वननीयं याचनीयं वसु याचने इत्यस्य प्रयोगो ज्ञातव्यः ॥)

वामः, पुं, (मातीति । मा गतिगन्धनयोः + मन् ।) हरः । (यथा, भागवते । ४ । ३ । ८ ।
"प्रजापतेस्ते श्वशुरस्य साम्प्रतं
निर्य्यापितो यज्ञमहोत्सवः किल ।
वयञ्च तत्राभिसराम वाम । ते
यद्यर्थितामी विबुधा व्रजन्ति ॥")
कामदेवः । पयोधरः । इति मेदिनी । मे, २६ ॥ (श्रीकृष्णस्य भद्रागर्भोत्पन्नः पुत्त्रविशेषः । यथा, भागवते । १० । ६१ । १७ ।
"संग्रामजित् बृहत्सेनः शूरप्रहरणोऽरिजित् ।
जयः सुभद्रो भद्राया वाम आयुश्च सत्यकः ॥")

वामदृक् [श्], स्त्री, (वामा मनोहरा दृक् दृष्टिर्यस्याः ।) नारी । इति राजनिर्घण्टः ॥

वामदेवः, पुं, (वाम एव देवः ।) शिवः । इत्यमरः । १ । १ । ३४ ॥ (यथा, महाभारते । १३ । १७ । ७० ।
"वामदेवश्च वामश्च प्राग्दक्षिणश्च वामनः ॥")
ऋषिप्रभेदः । यथा, पञ्चदश्याम् । ६ । ४५ ।
"आगामिप्रतिबन्धश्च वामदेवे समीरितः ।
एकेन जन्मना क्षीणो भरतस्य त्रिजन्मभिः ॥")

वामनः, पुं, (वामयति वमति वा मदमिति । वम + णिच् + ल्युः ।) दक्षिणदिग्गजः । (यथा, भागवते । ५ । २० । ३६ ।
"तदुपरिष्टाच्चतसृष्वाशास्वात्मयोनिनाखिलजगद्गुरुणा विनिवेशिता ये द्विरदपतयः ऋषभः पुष्करचूडो वामनोऽपराजित इति सकललोकस्थितिहेतवः ॥") ह्रस्वः । इत्यमरः । २ । ६ । ४६ ॥ (यथा, रघौ । १६।५१ ।
"व्योमपश्चिमकलास्थितेन्दु वा
पङ्कशोषमिव धर्म्मपल्वलम् ।
राज्ञि ! तत्कुलमभूत् क्षयातुरे
वामनार्च्चिरिव दीपभाजनम् ॥"
यथाच तत्रैव । १ । ३ ।
"प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः ॥")
अङ्कोठवृक्षः । हरिः । इति मेदिनी । ने, १२६ ॥ (यथा, महाभारते । १३ । १४९ । ३० ।
"उपेन्द्रो वामनः प्रांशुरमोघः शुचिरूर्जितः ॥")
शिवः । यथा, महाभारते । १३ । १७ । ७० ।
"वामदेवश्च वामश्च प्राग्दक्षिणश्च वामनः ॥"
अश्वभेदः । यथा, अश्ववैद्यके । ३ । १५३ ।
"एकेनाङ्गेन हीनेन भिन्नेन च विशेषतः ।
समजं वाजिनं विन्द्याद्वामनं वामनाकृतिम् ॥"
दनोः पुत्त्रभेदः । यथा, हरिवंशे । ३ । ८२ ।
"अयोमुखः शम्बरश्च कपिलो वामनस्तथा ॥"
भुजङ्गभेदः । यथा, महाभारते । १ । ३५ । ६ ।
"कालियो मणिनागश्च नागश्चापूरणस्तथा ।
नागस्तथा पिञ्जरक एलापत्रोऽथ वामनः ॥"
गरुडवंशीयः पक्षिविशेषः । यथा, महाभारते । ५ । १०१ । १० ।
"पङ्कजिदवनिष्कुम्भो वैनतेयोऽथ वामनः ।
वातवेगो दिशाचक्षुर्निमिषोऽनिमिषस्तथा ॥"
हिरण्यगर्भस्य सुतभेदः । यथा, हरिवंशे । २५३ । ६ ।
"गार्गः पृथुस्तथैवाग्नो जाम्बो वामन एव च ॥"